# श्रीसुरसरस्वतीसभा श्रृङ्गेरी

## तुरीया परीक्षा

## प्रथमपत्रिका

दिनाङ्कः - 01-02-2026 अङ्काः - 100

पूर्वाह्णे – 10:00 वादनतः 1:00 वादनपर्यन्तम् समयः – घण्टात्रयम्

<u>सूचना – सर्वाणि उत्तराणि संस्कृतेन एव लेखनीयानि</u>

**1 पञ्चानाम् एकवाक्येन उत्तरं लिखत ।** **5**

१. शिवगुरुः कुत्र तपः आचचार ?

२. वित्तस्य तिस्रः गतयः काः?

३. कौत्सः कः?

४. सुरेश्वराचार्याः कयोः उपनिषदोः भाष्यवार्तिकं रचयामासुः ?

५. लक्ष्मणसूरिभिः रचितेषु ग्रन्थेषु द्वौ निर्दिशत ।

६. विष्णुस्तुतिः कस्मात् ग्रन्थात् स्वीकृता ?

७. गोष्ठे भ्रमन्तं मत्तं वृषम् इव चन्द्रं कः ददर्श ?

८. भैमी का ?

**2 पञ्चानां त्रिचतुरैः वाक्यैः उत्तरं लिखत ।** **10**

१. शतानीकः कः ? देवेन्द्रः तं कुतः आमन्त्रयामास ?

२. भीष्मेण स्वपरिचयं पृष्टो द्रोणः तं किमवदत् ?

३. कुन्त्या पृष्टो द्विजः स्वपरिदेवननिदानं किमाह ?

४. गिरिः गुरुसेवां कथं विदधौ ?

५. अम्बरस्थः चन्द्रः कथं बभ्राज ?

६. योगिनः भगवन्तं कथं विचिन्वन्ति ?

७. किं वस्तु विद्वन् गुरवे प्रदेयमिति रघुणा पृष्टः कौत्सः किमुवाच ?

**3 द्वयोः विस्तरेण (सप्ताष्टैर्वाक्यैः) उत्तरं लिखत ।** **8**

१. रघोः औदार्यं वर्णयत ।

२. पाण्डोः शापवृत्तान्तं वर्णयत ।

३. शङ्करावतारपाठस्य कथां सङ्ग्रहेण वर्णयत ।

४. कृष्णार्जुनाभ्यां पृष्टो विप्रवेषधारी वीतिहोत्रः तौ किमाह ? ततः किमभूत् ?

**4 वाक्यत्रयं सप्रसङ्गं विवृणुत ।** **9**

१. मा च मे पुत्रस्य तेन पापमाशङ्किष्ठाः ।

२. वत्से! मा शुचः । कश्चित् कालम् अत्रैवाश्रमे वस ।

३. त्वमस्माकं दूतो भवन् साहाय्यं कर्तुमर्हसि ।

४. ग्रहाणां गतिरधुना प्रतिकूला नो दृश्यते ।

५. पादं सुमेरोरिव वज्रभिन्नम् ।

**5 द्वयोः भावं विशदयत ।** **8**

१. तथेति तस्यावितथं प्रतीतः प्रत्यग्रहीत् सङ्गरमग्रजन्मा ।
गामात्तसारां रघुरप्यवेक्ष्य निष्क्रष्टुमर्थं चकमे कुबेरात् ॥

२. साफल्यं कृततपसो विधातुकामः सद्विप्रान् बहुरुचि भोजयाञ्चकार ।
सद्भक्त्या तदशितशेषभोक्तृभर्तुः शिष्टं सान्वशितवती दधार गर्भम् ॥

३. चतुर्वर्गफलं ज्ञानं कालावस्थाश्चतुर्युगाः ।
चतुर्वर्णमयो लोकस्त्वत्तस्सर्वं चतुर्मुखात् ॥

४. लोकस्य पापानि विनाशयन्तं महोदधिं चापि समेधयन्तम् ।
भूतानि सर्वाणि विराजयन्तं ददर्श शीतांशुमथाभियान्तम् ॥

**6 श्लोकमेकं पूर्णं लिखत ।** **4**

१. व्याघ्री .................. चित्रम् ॥

२. यद्धात्रा .................. जलम् ॥

**7 एकस्य कवेः देशकालकृतिमहत्त्वादीनां विषये लिखत ।** 4

१. वाल्मीकिः २. लक्ष्मणसूरिः

**8 एकस्य लघुटिप्पणीं लिखत ।** 4

१. एकचक्रनगरम् २. शतानीकस्य परोपकारस्वभावः

**9 चत्वारि पदानि वाक्ये योजयत ।** 4

१. अपत्यम् २. पर्णाशी ३. कुटुम्बिनी

४. अकरोत् ५. अलम् ६. चरणारविन्दे

**10 चतुर्णां रूपाणि विवेचयत ।** 4

१. कृतिनाम् २. असहमानः ३. सपदि

४. प्रीतिकण्टकितत्वचः ५. आयुः ६. मन्येत

**11 चतुर्णां पर्यायपदानि लिखत ।** 4

१. सिसृक्षया २. तमिस्रा ३. भृशम्

४. पुत्रीयन् ५. पुष्करः ६. विषादः

**12 चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत ।** 4

१. यथाकालम् २. तत्कृततपसा ३. कापथम्

४. श्रृङ्गगिरिक्षेत्रम् ५. साकेतनिवासिनः ६. पञ्चनली

**13 चतुर्णां सन्धिं विभज्य नाम लिखत ।** 4

१. अध्यापयन्नधीश्वरो यतीनाम् २. गच्छंश्च ३. कश्चिन्मृत्युः

४ द्वित्राण्यहान्यर्हसि ५. नरेन्द्रस्तथा ६. नातिदूरे

**14 द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत ।** 6

१. श्रृणोतु २. विजहार ३. यतिष्यते ४. प्रादात्

**15 द्वयोः व्याकरणविशेषं लिखत ।** 4

१. स्वस्त्यस्तु ते २. उपतस्थिरे ३. नरकात् त्रायते ४. अन्तर्वत्नी

**16 समासमेकं सलक्षणं विशदयत ।** 4

१. बहुव्रीहिसमासः २. कर्मधारयसमासः

**17 चतुर्थं पदं लिखत ।** 4

| | | | | | | |
|---|---|---|---|---|---|---|
| १. | उदयनचरितम् | – | बृहत्कथामञ्जरी | :: | आदिपर्व | – ________ |
| २. | कौत्सः | – | वरतन्तुः | :: | पद्मपादः | – _________ |
| ३. | शन्तनुः | – | अम्बालिका | :: | जनमेजयः | – _________ |
| ४. | महान् राजा | – | महाराजः | :: | वाक् च मनश्च | – _________ |

**18 इतरवचनानि लिखत ।** 4

| | | | |
|---|---|---|---|
| १. | _________ | _________ | प्राणिनाम् । |
| २. | शाधि | _________ | _________ । |
| ३. | _________ | पितरौ | _________ । |
| ४. | वृष्णिकेतौ | _________ | _________ । |

**19 रिक्तस्थानानि पूरयत ।** 4

१. मयि ________________ नाम वीणास्ति ।

२. सः तस्यां भैम्याम् ________________ पुत्रम् ________________ पुत्रीं चोत्पादयामास ।

३. ममैकं वचनं श्रुत्वा ततो ________________ ।

४. अभ्युपपद्यस्वाधुनापि मम ____________ ।

**20 प्रयोगपरिवर्तनं कुरुत ।** 2

१. यत्र विराजतेऽद्यापि सा शारदा ।

२. ते सर्वे सर्वदा सातङ्का एव न्यवसन् ।

------------------------